International Journal of Sanskrit Research 2019; 5(1): 01-03

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2019; 5(1): 01-03
© 2019 IJSR
www.anantaajournal.com
Received: 01-11-2018
Accepted: 04-12-2018

**Munmun Nandy**
M.A. M.Phil. In Sanskrit,
Burdwan University,
Bardhaman, West Bengal, India

# वैदिकसृष्टितत्त्वविमर्शः

**Munmun Nandy**

## प्रस्तावना

जगतः उत्पत्तिविषयकभावना सुप्राचीनकाले हि भारतभूमौ सञ्जाता। विश्वव्रह्माण्डस्य तथा जगतप्रपञ्चस्य सृष्टिरहस्योद्घाटने प्राचीनऋषिकवीनां प्रयासो भूयो लक्ष्यते। वेदेषु प्राचीनतमः ऋग्वेदः एतस्मिन् विषये अग्रगन्य इति मन्यते। अत्र देवतास्तुतिमूलकसूक्तादतिरिच्य केचन मन्त्रा अपि प्राप्यन्ते यत्र जगत्प्रपञ्चस्य कारणमन्विष्टम। यत्र परमसत्तायाः स्वरुपान्वेषणे ऋषयः उत्सुकाः दृश्यन्ते। परवर्तिदार्शनिकभावनानां वीजस्वरुपमिमानि सूक्तानि दार्शनिकसूक्तानि इति आख्ययापि अभिधीयन्ते। परवर्तिषु स्मृतिपुराणादिशास्त्रेषु एतादृशीभावना वहुधा विकशिता दृश्यते। ऋग्वेदे तथा समग्रवेदिकसाहित्ये सृष्टिविषयकभावनायाः कानिचित् वोशिष्ट्यानि परिलक्ष्यन्ते। उत्पत्तिविषयकेषु मन्त्रेषु एषु वहुषु स्थलेषु व्रह्माण्डोत्पत्तिः आलोचिता। जगत्प्रपञ्चस्य तथा स्थावरजङ्गमात्मकपृथिव्याः सृष्टिः तथा देवतानां सृष्टिरपि वैदिकसृष्टितत्वसमन्धितायामालोचनायां स्वस्थानं प्राप्नुतः। एवञ्च मनुष्यादिजीवानां उतपत्तिरपि वर्णिता। न केवला सृष्टिः अपि च तेषां सृष्टपदार्थानां स्थितिः, अनन्तरं जातवस्तूनां ध्वंसश्च वैदिकसृष्टिविषयकालोचनायां प्राप्यन्ते। चक्रकार्यवशाद् हि सृष्टिप्रक्रिया कालवशाद् प्रचलति। ध्वंसकार्यात् परं पुनः सृष्टिः अनन्तरं पुनर्ध्वंसः अनेन प्रकारेण सृष्टेः पुनरावर्तनं वेदादिशास्त्रे वर्णितमस्ति।
वैदिकसृष्टिप्रकरणे वहवो विषयाः आलोचितास्सन्ति। एतन्मध्ये व्रह्माण्डोत्पत्तिः, सृष्टिकर्तुः उतपत्तिः, देवतानां उत्पत्तिः, पार्थिवपदार्थानां सृष्टिः इत्यादीनि वृत्तान्तानि नानाविधमाख्यानमाधारीकृत्य सम्यग् रूपेन आलोचिताः। एतेषां वर्णनं यथासाध्यं निम्ने क्रियते।

## सृष्टिकार्ये आध्यात्मिकी शक्ति

ऋग्वेदे वर्णितं यद् सृष्टेः प्राक् इदं जगत् सदसदभावभिन्नमासीत। तदा एकः सर्वशक्तिमान् जगतः कारणरूपेन अवर्तत। व्यावहाराभावात् शून्यो नाम आकाशस्यापि अस्तित्वं नासीत। न मृत्युरासीद् तस्मादमृतत्वमपि नासीत। अवातस्य व्रह्मस्यैवास्तित्वमासीत। दिवारात्रेः पार्थक्यं नासीत। तमसा सर्वमावृतमासीत। इदं जगत् जलोमयमासीत। अस्य विश्वस्य कारणभूतात् जलाद् भिन्नं किमपि चिह्णं नासीत। तद् यद् स्थितमासीत, तत्सर्वव्यापकं भावरूपात्मकाज्ञनमासीत। ततः उक्तम–

तमः आसीत् तमसा गूढमग्रेऽप्रकेतं सलिलं सर्वमिदम् ।
तुच्छ्येनाभ्वपिहितं यदासीत् तपसस्तन्महिनाजायतैकम् ।। १

अनन्तरं तपोप्रभावात् स्वसंकल्पवशात् ईश्वरः जगत् सृष्टवान। तस्माद् परं कामादिविमूर्तविषयान् सृष्टवान। सूक्तमिदं नासदीयमित्युच्यते। असदात्मकात् अन्धकारात् जगतः उतपत्तिःअत्र वर्णिता। किन्तु हिरण्यगर्भे सूक्ते सृष्टेरुत्पत्तिकारणं किञ्चित् भिन्नमस्ति। सृष्टेः प्राक् हिरण्यगर्भस्य अस्तित्वं केवलमासीत। स सर्वेषां भूतवर्गानां स्रष्टृरूपेन स्थित आसीत। स पृथिवीलोकं द्युलोकमन्तरीक्षलोकञ्च दाधार। सामान्यतः हिरण्यगर्भशव्देनात्र जीवात्मा एव विवक्षिता।

हिरण्यगर्भसमवर्तताग्रे भुतस्य जातः पतिरेक आसीत।
स दाधार पृथिवीं द्यामुतेमां, कस्मै दैवाय हविषा विधेम।। २

अन्यत्र पञ्चविंशत्युत्तरशततमे सूक्ते आम्भृणीवाक् व्रह्मसायुज्यमनुभूय स्वं व्रह्मस्वरुपमिति मन्यमाना जगतः स्रष्ट्री इति कथयति। व्रह्मणं शिवस्थानीयं द्युलोकमथवा व्रह्मणो शिरसि स्थितमाध्यातिकमाकाशस्य उत्पादयित्री सा।३ देवानां जनयित्री धारयित्रीरूपेन स्वां घोषयति।

**Correspondence**
**Munmun Nandy**
M.A. M.Phil. In Sanskrit,
Burdwan University,
Bardhaman, West Bengal, India

पुरुषसुक्ते विराडाख्यपुरुषात् जगत्प्रपञ्चस्य उत्पत्तिकथा वर्णिता। अत्रोक्तं, यदिदं वर्तमानं जगत् तत्सर्वं पुरुष एव। यथास्मिन् कल्पे वर्तमानाः प्राणिदेहाः सर्वेऽपि विराटपुरुषस्य अवयवाः अमृतत्वस्य देवस्य स्वामी स विराडाख्यपुरुषो अन्नेन प्राणिनां भोग्येन फलेन स्यीयां कारणावस्थां अतिक्रमति। ४ इत्थं नासदीयादिषु सूक्तेषु जगद्व्रह्माण्डस्य कारणरुपेन परव्रह्म जीवात्मा परमात्मा च वर्णितास्सन्ति।

व्रह्मणा जगत्सृष्टिः ऋग्वेदे अन्यत्रापि दृश्यते–

व्रह्मणस्पतिरेता स कर्मार इवाधमत्।
देवानां पूर्व्ये युगे असतः सदजायत।।ऋग्वेद. १०७२०२

दिव्यान् परमानून् एकत्र तप्त्वा अव्यक्तकारणाद् असतो वा सज्जगतो उत्पत्तिरत्र वर्णिता। नासदीयसूक्तवदत्रापि असद् कारणाद् सृष्टिप्रक्रिया आरब्धा।

### सृष्टिकर्तृरुपेन वैदिकदेवता

वेदे प्रायशो देवता अपि सृष्टिकार्ये अंशभाजः दृश्यन्ते। ऋग्वेदे षष्ठमण्डले वैश्वानरमग्निदेवं स्वर्गलोकस्य स्रष्टा इति उल्लिखिता। स्वर्गलोकस्य निर्माता, ऋतस्य अविता च स देवः। ५ अस्मिन्नेव मण्डले सोमदेवः कदाचिद् स्वर्ग–दिवा–रात्रि–जल–भेषजै सह पृथिव्या अपि निर्माता इति स्तूयते ६। अन्यत्र त्वष्टृदेवः एतेषां कर्ता

देवस्त्वष्टा सविता विश्वरुपः पुपोष परजाः पुरुधाजजान।
इमा च विश्वा भुवनान्यस्य म... ।। ७

ऋग्वेदे वहुस्थलेषु त्वष्टृदेवस्य एतावती महिमा दृश्यते। –

अहम् इन्द्रो वरुणस ते महित्वोर्वी गभीरे रजसी सुमेके।
तवष्टेव विश्वा भुवनानि विद्वान् सम ऐरयं रोदसी धारयं च।। ८

ऋग्वेदस्य दशममण्डलेऽपि त्वष्टृदेवस्य एतादृशी कृतिरस्ति।६ विश्वकर्मापि स्वर्ग–मर्त्यस्रष्टृदेवरूपेन ऋगवेदे उल्लिखितोऽस्ति।

किं सविदासीदधिष्ठनमारम्भणं कतमत सवित्कथासीत्।
यतो भूमिं जनयन विश्वकर्म वि दयामौर्णोन महिना विश्वचक्षाः।। १०

इन्द्रदेवोऽपि द्यावापृथिव्याः कर्ता इति उच्यते। –'

इन्द्रः एकः अन्यत् विश्वमानुसक चक्रसे'।

### सृष्टिप्रक्रियायां जलतत्वम्–

–वैदिकसृष्टितत्वे जलम् आदिभूतमिति वहु वर्णितम। परवर्तिदार्शनिकपञ्चतत्वमध्ये (क्षिति–अप–तेजो–मरुत–व्योम) जलस्यैव सृष्टिकार्ये आदिपदार्थरूपेन स्वीकृतिरस्ति। ११ जलाद् हि अन्ये सर्वे पदार्थास्समुत्पन्नाः। व्रह्माण्डस्य स्थानं सृष्टेः प्राक् जले हि आसीत। तदनन्तरं जलं क्रमाद् अन्येषु सृष्टद्रव्येषु परिगनितं दृश्यते। ऋग्वेदवद् अथर्ववेदोऽपि जलमादिवस्तु इति गणयति। अत्र लक्षणीयं ऋगवेदे जलं आदिकारणभूतं कथितमस्ति। १२ जलाद् अग्निदेवतापि जाता। तस्मादुक्तम्-

यं तवा द्यावापृथिवीं यं तवापस्त्वष्टा यं तवा सुजनिमा जजान।
पन्थामनु परविद्वान्पित्र्याणं द्युमदग्ने समिधानो वि भाहि।। १३

आदिजलतत्वं कदापि आदिस्रष्ट्रीदेव्या अदित्या समन्धितमस्ति। –

विश्वा हि वो नमस्यानि वन्द्या नामानि देवा उत यज्ञियानिवः।
ये सथ जाता अदितेरब्भ्यस परि ये पर्थिव्यास्तेम इह शरुता हवम।। १४

अनेनप्रकारेण वैदिकसृष्टितत्वे जीवनस्योदगमे तद्रक्षणे अपां भूयो वर्णना दृश्यते।

### सृष्टिकार्ये विमूर्तविषयाः

सृष्टिकार्ये अनेके विमूर्ताः विषया अपि अपेक्षन्ते। ते यथा विशृंखला, कालः, दिव्यालोकः, कामना, तपः इत्यादयः। नासदीयसूक्ते सृष्टेः प्राक् जगतो अन्धकारात्मकं पक्षं स्वीकृतमस्ति। सर्वस्मिन् तमोमये स्वसंकल्पवशाद् कामनावशाद् वा तद् व्रह्म जगद्रूपेण स्वं प्रकटितवान। तदनन्तरं स सृष्टेः कारणीभूतः सन् अतिष्ठन। उक्तञ्च तत्र– कामस्तदग्रे समवर्तताधि मनसो रेतः प्रथमं यदासीत। अत्रैव तपस्संक्ल्पो वा उत्ताप इति वर्ण्यते। तस्य व्रह्मणः सृष्टिकारणस्य वा संवर्धनं विकाशश्च मनोकामनावशादासीत।
तैत्तिरीयोपनिषद्यपि परमात्मनः कामनावशाद् तपोप्रभावाद् सृष्टिप्रक्रिया प्रतिपादिता। अत्र व्रह्मानन्दवल्ल्याः षष्ठे अनुवाके उच्यते दृ 'सोऽकामयत। वहुस्यां प्रजायेयेति । स तपोऽतप्यत। स तपः तप्त्वा इदं सर्वमसृजत। यदिदं किञ्च तद् सृष्ट्वा तदेवानुप्राविशत। तदनुप्रविश्य, सच्च त्यच्च, निरुक्तं चानिरुक्तञ्च निलयन चानिलयन च । विज्ञानं चाविज्ञानञ्च। सत्यं चानृतं च। सत्यमभवत। यदिदं किञ्च। तत् सत्यमित्याचक्षते।'
ऋग्वेदे पुनः पुरुषसूक्तेऽपि सृष्टिविषयकोपलब्धिः विकशिता दृश्यते। यत्र अस्य सर्वस्य जगत्प्रपञ्चस्य कारणरूपेन पुरुषस्य वर्णनमस्ति। इदं पार्थिवं पदार्थभुतं जगत् विराटपुरुषदेहस्य विभाजनेन जातमस्ति। पृथिवी, आकाशः, वायुः, सूर्यः, चन्द्रः इमे सर्वे पदार्थाः पुरुषाद्धि जाता। सर्वस्य भूतस्य जातस्य वा भव्यस्य जायमानस्य च कर्तास्ति पुरुषः। इदं सूक्तानुसारं पुरुषो सर्वस्य जागतिकस्य उपादानकारणं निमित्तकारणञ्च। वस्तुतो पुरुषोऽत्र निखिलभूतवर्गानां एका कारणरुपा अविनाशिनी शक्ति इति विधातव्यः। हिरण्यगर्भ– वाक– वृहस्पत्यादिषु सूक्तेष्वपि इत्थम् एकस्याः अविनाशिन्याः शक्त्याः सृष्टिकार्ये उपयोगिता दृश्यते।
वाकसूक्ते वाचः शक्तिः सर्वेषां जगतां आधाररूपा वर्णिता। आम्भृणी वाक् स्वां व्रह्मे एकीभूत्य जगतः स्रष्ट्रीति घोषयति। तत्वमिदमाधारीकृत्य परवर्तिषु व्याकरणग्रन्थेषु अनादिनिधनं शव्दव्रह्म जगतः कारणमिति वर्णितम। वाक् शव्दं वा अत्र जगत्प्रपञ्चस्य विवर्तकारणरूपेन आलोचितम।
आख्यानमाध्यमेन वेदे प्रायो सृष्टिवर्णनं दृश्यते। कालवशाद् एषु आख्यानेषु वहु विवर्तनमायाति। अस्य विवर्तनस्य धारा अन्वेषने भाष्यादिव्याख्यानग्रन्थानां अध्ययनमपेक्षितम। परवर्तिषु साहित्यपुराणेषु वैदिकसृष्टितत्वस्य प्रभावो वहुधा विस्तृतो लक्ष्यते।

### अन्त्यटीका

1. ऋग्वेदः, १०.१२६.३.
2. ऋग्वेदः, १०.१२१.१.
3. तदेव १०.१२५.७.
4. पुरुष एवेदं सर्वं यत् भूतं यच्चभव्यम
   उतामृतत्वस्येशानो यदन्नेनातिरोहति'। –ऋगवेदः १०.९०.२.
5. तदेव ६.७.७.
6. तदेव ६.४२.३.
7. तदेव ३.५५.१६.
8. तदेव ४.४२.३.
9. ऋग्वेदः १०.२.७ ६१०.४६.६ ६ १०.११०.६.
10. तदेव १०.८१.२.
11. तदेव १०.१२१.६
12. तदेव १०.८१.
13. तदेव १०.२.७.
14. तदेव १०.६३.२.

**सहायकग्रन्थसूची**


1. अधिकारी, तारकनाथ, भट्टाचार्य, भवानीप्रसाद, वैदिक संकलन (द्वितीय खण्ड), संस्कृत वुक डिपो, कलिकाता, २००१.।
2. गोस्वामी, सीतानाथ, (सम्पादक) कठोपनिषद, संस्कृत पुस्तक भाण्डार, कलिकाता, पुनर्मुद्रन, २००६.।
3. च्याटार्जी, तृष्णा, (सम्पादक) तैत्तिरीय ब्राह्मण, रामकृष्ण मिशन इनस्टिटिउट अव कालचार, कलिकाता, २०१६.।
4. चक्रवर्ती, परशुराम, (सम्पादक) ऋग्वेद संहिता, रामकृष्ण मिशन इनस्टिटिउट अव कालचार, कलिकाता, २०१६.।
5. वन्द्योपाध्याय, शान्ति, वैदिक पाठ संकलन, सदेश, कलिकाता, २०११।
6. सांख्य– वेदान्ततीर्थ, दुर्गाचरण, (सम्पादक) तैत्तिरीयोपनिषद्, देव साहित्य कुटिर, कलिकाता ।